स्त्रीन्टत्यं लास्यमुच्यते" शब्दार्थचि० धृतवाक्योक्ते २पुं-न्टत्ये च "गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणेः" मालतीमा०।२उद्धतन्टत्ये ३तृणभेदे च मेदि०।

**ताण्डवतालिक** पु० ताण्डवे तालस्तद्दानं शिल्पमस्य ठञ्। शिवद्वारपालके नन्दीश्वरे त्रिका०। [प्रियमात्रे त्रि०।

**ताण्डवप्रिय** पु०ताण्डवं प्रियमस्य। १शिवे शब्दमा० २न्टत्य-

**ताण्डवित** त्रि० ताण्डव+क्वतौ णिच् कर्म्मणि क्त। नर्त्तिते। "अतिप्रांशुवंशकाण्डताण्डवितधौतसितसूक्ष्माम्बरसहस्रम्" "विकटललाटतटताण्डवितभ्रूकुटिना क्रुद्धेन महामोहेन" प्रबोधच०।

**ताण्डिन्** पु० ब० व०। ताण्ड्येन प्रोक्तमधीयते वैशम्पायनान्तेवासित्वात् इनि–यलोपः। तण्डिमुनिपुत्रताण्ड्यप्रोक्तशाखाध्यायिषु। तस्य छात्रः अण् संयोगपूर्वकेनो न टिलोपः। ताण्डिन तस्य छात्रे। स च यजुर्वेदस्य कल्पसूत्रकर्त्ता तण्डिशब्दे ३२०७ पृ० दृश्यम्।

**ताण्ड्य** पु० तण्डिमुनेरपत्यम् गर्गा० यञ्। तण्डिमुनेरपत्ये स्त्रियां ङीप् यलोपः। ताण्डी।

**तात** पु० तन–क्त दीर्घश्च। पितरि अमरः। "दृषदीषदनधीतविद्यया तातमातृसुदमाविवर्द्धयन्" कुसुमाञ्जलौ हरिदासः "हा तातेति क्रन्दितमाकर्ण्य विषण्णः"रघुः। २अनुकम्प्ये मेदि०।"नाहं गच्छामि वस्ताता! दृष्टीर्नांस्मि कृपान्विताः" भा० आ० १७६ अ०। "स तात इति विप्रर्षिं वशिष्ठं प्रत्यभाषत। मातुः समक्षं कौन्तेय! अपश्यन्त्याः परन्तप!। तातेति परिपूर्णार्थं तस्य तन्मधुरं वचः। अपश्यन्त्यश्रुपूर्णाक्षी शृण्वती तमुवाच ह। मा तात! तात! तातेति ब्रूह्येनं पितरं पितुः। रक्षसा भक्षितस्तात! तव तातो वनान्तरे। मन्यसे यन्तु तातेति नैष तातस्तवानघ!। आर्य्य एष पिता तस्य पितुस्तव यशस्विनः" भा० आ०१७८अ० "ज्येष्ठस्तातो भवति वै ज्येष्ठो मुञ्चति कृच्छ्रतः" भा० आ० २२२ अ०। ३पूज्ये त्रि० शब्दरत्ना०।"तस्मान्मुच्ये यथा तात! संविधातुं तथार्हसि"रघुः। पूज्यं वसिष्ठं प्रति दिलीपसम्बोधनम्।

**तातगु** पु० तातस्येव गौर्वाचकशब्दो यस्य गवान्तत्वात् गौण्ये ह्रस्वः। पितृभ्रातरि पितृव्ये। २जनकहिते शब्दार्थचि० त्रि०।

**ताततुल्य** पु० ३त०। पितृसमाने हैमच०। तातसमादयोऽप्यत्र

**तातन** पुंस्त्री तातं प्रशस्तं न्तनति न्तस–ड। खञ्जनखगे त्रिकाण्डशेषः स्त्रियां जातित्वात् ङीष् तातनी।

**तातल** पु० तापं लाति ला–क पृषो०। १रोगे २पाके ३लौहकूटे ४मनोजवे च ०मेदि०। ५तप्तमात्रे त्रि०अजयपालः।

**ताति** पु० ताय–क्तिच्।१पुत्रे जटाधरः। ताय–भावे क्तिन्। २वृद्धौ स्त्री"तद्भवता निष्पन्नाशिषां काममरिष्टतातिम् आशास्महे" वी० च०। तातिल्प्रत्ययान्तः अरिष्टताति शब्दइत्यन्ये।

**तात्कालिक** त्रि० तस्मिन् काले भवः काश्या० आपदादिपूर्वकात्कालान्तात् ठञ् ञिठ् वा। तत्कालभवे तत्र ठञि स्त्रियां ङीप् ञिठि टाप् इति भेदः "कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः" शु०त० शङ्खः। "भवेत् तात्कालिको ग्रहः" ज्यो०। तात्कालिकस्वरचक्रम् चक्रशब्दे दृश्यम् "अहर्गणोत्पन्नग्रहस्य तात्कालिकत्वात्" सू० सि० रङ्गना०।

**तात्पर्य्य** न० तत्परस्य भावः ष्यञ्। १वक्तुरिच्छायाम्, २अभिप्राये ३तत्परतायाञ्च। तात्पर्य्यशब्दार्थनिरूपणेन तात्पर्य्यज्ञानस्य शाब्दबोधजनकत्वमनुमानचि० समर्थितं यथा "तात्पर्य्याधीनं शब्दप्रामाण्यम्। तत्र तत्परत्वं न तत्साध्यकत्वम्। पदार्थतत्संसर्गयोः शब्दासाध्यत्वात्। अथ तद्गोचरप्रवृत्तिनिवृत्तिसाध्यकत्वं तत्परत्वं तच्च भव्यार्थस्य साक्षात्, भूतार्थस्य तु प्रशंसानिन्दावाक्यस्य प्रशस्तनिन्दितस्वार्थप्रतिपादनद्वारा लाक्षणिकस्य लक्षणीयविषयप्रवृत्तिनिवृत्तिजनकत्वेन तत्परत्वमिति चेत् न तत्परत्वेऽङ्गीकृते तज्ज्ञानं जनयित्वा तत्र प्रवर्त्तकत्वं तत्प्रवर्त्तकत्वे च तत्परत्वमिति परस्पराश्रयात् लाक्षणिकस्याननुभावकत्वेऽपि लक्षणीयपरत्वात् काव्यादेः स्वरूपाख्यानमात्रपर्य्यवसानाच्च। ननु तद्बुद्धिजनकत्वं तत्परत्वं प्रशंसानिन्दावाक्यमपि प्रशस्तनिन्दितस्वार्थधीहेतुत्वेन तत्परार्थकं तच्च ज्ञानं प्रशस्ते सर्वः प्रवर्त्तते निन्दिताच्च निवर्त्तत इति स्वविषये प्रवृत्तिनिवृत्ती जनयतीति तत्परमुच्यत इति चेत् न गौणलाक्षणिकयोरननुभावकत्वात्। तद्बुद्धिजनने तत्परत्वमित्यन्योन्याश्रयाच्च तज्जननयोग्यत्वमिति चेत् तथैकत्रोच्चारणेन नानार्थे नानार्थपरत्वं लक्षणायाञ्च तुल्यार्थपरत्वं स्यात् योग्यतासत्त्वात् नापि तत्प्रतिपदाद्यकत्वं तात्पर्य्यं विना न तथेत्यन्योन्याश्रयात् प्रशंसादिवाक्यस्य प्रवृत्त्याद्यप्रतिपादकत्वात् लाक्षणिकस्याप्रतिपादकत्वाच्च। अथ गङ्गापदं स्वार्थाविनाभावे तीरं प्रतिपादयत् तत्पर-